# वेदविन्महिमा

वेदवारिधिः प. रामानुजः

आविष्णोरभिवन्द्यादावाचार्याणां परम्पराम् । वेदाचार्यान् स्वतातांश्च पराङ्कुशसदाह्वयान् ॥

विदुषां कृष्णमूर्तीनां पितृपादजनेर्महे । शताब्द्यां शास्त्रिवर्याणां तत्स्नेहप्रेरणान्मुदा ॥

वात्स्यरामानुजार्येण तैत्तिरीयमधीयता । वेदविन्महिमा तावद्वेदोक्तं सम्प्रकाश्यते ॥

परमसुहृदां विद्वत्तल्लजानां ब्रह्मश्री कृष्णमूर्तिशास्त्रिणां पूज्यपितृपादीयजन्मशताब्द्युत्सवावसरे ममापि लेखरूपेण भागग्रहणावकाशं कल्पितवतां तेषां कार्तज्ञ्यं व्याहृत्य वेदविद्यानिष्ठानाम् उत्सवनायकानां तथा समेषां विदुषां च प्रीतये वेदविदां माहात्म्यं यथाश्रुतं किञ्चित् प्रतिपादये । अनेन वाचिककैङ्कर्येण प्रीयतां वेदवेद्यो भगवान् जनार्दनः।

## ब्रह्ममहिमा

तैत्तिरीये काठके वैश्वसृजसत्रे, 'विश्वसृजः प्रथमाः सत्रमासत' इति प्रकरणे, श्रुतिः ब्रह्मणः स्वरूपं जगत्कारणत्वं च उद्भावयन्ती एवं ब्रवीति, तपःप्रभृतयः प्रथमाः विश्वसृजः यदा सहस्रसंवत्सरं सत्रमासत, तदा ब्रह्म हिरण्मयशकुनिरूपेण तेषामाविर्बभूव, हंसावतारत्वेनेति यावत् । तच्च ब्रह्म जगद्रक्षकम्, उपनिषदि, 'ब्रह्मन् त्वमसि विश्वसृक्, तेजोदास्त्वमस्यग्नेः, वर्चोदास्त्वमसि सूर्यस्य' इतिवत्, सूर्यस्यापि इन्धकं, तेन महातेजसा इद्धः संदीप्तबलः सूर्यः तपति, तेजस्वी भवति । तच्च, 'स एव पुत्रः स पिता स माता', 'स नो बन्धुर्जनिता स विधाता' इत्यादि प्रमाणैः सर्वेषां पितृस्थानीयं सदपि, योनियोनौ पुत्रेण पितृमद् भवति - विभिन्नयोनिषु अवतरणवेलायां, यथा रामकृष्णाद्यवतारदशासु दशरथ-वसुदेवादीन् पितृत्वेनाभिमत्य पुत्रत्वं भजते । तद् ब्रह्म बृहत् भवति, निरतिशयबृहदिति यावत् । 'बृहत्त्वात् बृंहणत्वाच्च ब्रह्मेति परिकीर्त्यते ।' तं बृहन्तम् अवेदवित् वेदार्थानभिज्ञः कश्चित् न मनुते, वेदज्ञानमन्तरा ज्ञातुं न पारयति । स च 'अन्तःप्रविष्टः शास्ता जनानाँ सर्वात्मा', परमात्मा, सर्वानुभूः, सर्वत्र व्याप्ति, नियमनैः मोक्षप्रदश्च भवति । तस्मात् साम्परायनामके दुःखादिहेतुभूतबन्धकसंसारापगमे, परं ज्योतीरूपब्रह्मोपसम्पद्य स्वेन रूपेण अभिसम्पत्तिरूपमोक्षे तदनुभवाख्यं निरतिशयं ब्रह्मानन्दम् अवेदवित् न प्राप्तुं शक्नोतीति यावत् । गीतासु (11.54) च, 'भक्त्या त्वनन्यया शक्य अहमेवंविधोऽर्जुन । ज्ञातुं द्रष्टुं च तत्त्वेन प्रवेष्टुं च परन्तप ॥' इत्युक्तत्वात् । 'तद्विप्रासो विपन्यवो जागृवांसः समिन्धते । विष्णोर्यत्परमं पदम्' इति, तदपि तत्कृपयेति 'तमक्रतुं पश्यति वीतशोको धातुः प्रसादान्महिमानमीशम्', परमे पदे भगवद्गुणगणवर्णनानुभवेन परमानन्दतुन्दिलाः विराजन्त इति ज्ञायते । एवं वाङ्मनसातीतवैभवं ब्रह्मगुणाननवधिकत्वेन प्रतिपाद्य तदविदुषो निन्दा तदप्राप्तिमुखेन क्रियते ।

वेदार्थज्ञानद्वारा तद्विदुषस्तु, मुण्डकोपनिषदि (3.1.3) 'यदा पश्यः पश्यते रुक्मवर्णं कर्तारमीशं पुरुषं ब्रह्म योनिम्। तदा विद्वान् पुण्यपापे विधूय निरञ्जनः परमं साम्यमुपैति' इति, तैत्तिरीये, 'ब्रह्मविदाप्नोति परम् । तदेषाऽभ्युक्ता । सत्यं ज्ञानमनन्तं ब्रह्म । यो वेद निहितं गुहायां परमे व्योमन् । सोऽश्नुते सर्वान्कामान्त्सह । ब्रह्मणा विपश्चिता' इति, 'स एको ब्रह्मण आनन्दः । श्रोत्रियस्य चाऽकामहतस्य' इति, 'सायुज्यँ सलोकतामाप्नोति', 'सार्ष्टिताँ समानलोकतामाप्नोति', 'ब्रह्मणो महिमानमाप्नोति' इति च श्रुता तन्माहात्म्यसाम्यापत्तिश्च पुनः वर्ण्यते उत्तरमन्त्रे । तस्य ब्रह्मणः उपासनरूपज्ञानात् (ब्रह्म अनितीति ब्राह्मणः इत्यस्मात् ब्राह्मणशब्दः उपासकवाची) एषः नित्यः महिमा कर्मणा वृद्धिक्षयराहित्यरूपः तत्प्राप्तिं प्रसाध्य पापकर्मलेपरहितं करोति । अपहतपाप्मा भवतीति यावत्। अत्र ब्रह्मवेदनं पदविदिति निर्देशात् परब्रह्मणः स्थानं, शब्दं चरणं वा वेत्तीति 'तद्विष्णोः परमं पदँ सदा पश्यन्ति सूरयः', 'सोऽध्वनः पारमाप्नोति तद्विष्णोः परमं पदम्' इति, 'विष्णोः पदे परमे मध्व उत्सः' इत्यादिषूक्तं 'देवानां पूरयोध्या । तस्याँ हिरण्मयः कोशः । .... यो वै तां ब्रह्मणो वेद । अमृतेनावृतां पुरीम् । .... पुरँ हिरण्मयीं ब्रह्मा । विवेशापराजिता ।', '... अपापो विरजो निर्मुक्तो मुक्तकिल्बिषः । नाकस्य पृष्ठमारुह्य गच्छेद्ब्रह्मसलोकताम्',

'परेण नाकं निहितं गुहायां विभ्राजते यद्यतयो विशन्ति', इत्यादिना विशेषितम् अप्राकृतं स्थानं प्राप्य तस्यैव भोगमात्रे साम्यं भजते इति प्रशंसा क्रियते । 'भोगमात्रसाम्यलिङ्गाच्च' इति सूत्रं च वरीवर्ति । 'जगद्व्यापारवर्जम्' इति च ।

एवमन्वयव्यतिरेकाभ्यां वेदार्थज्ञान-तदभावौ परम्परया ब्रह्मप्राप्ति-तदभावहेतुभूतौ भवत इत्युक्त्या वेदस्यापि श्रैष्ठ्यं तद्वेत्तुर्महिमा च सूच्यते ।

## वेदमहिमा

'नेन्द्रियाणि नानुमानं वेदा एवैनं वेदयन्ति' इति पिप्पलादश्रुतेः, प्रत्यक्षेणानुमित्या वाऽबुद्धमुपायं येन विदन्ति स वेद इति च प्रमाणानुगुणं ब्रह्म, शास्त्रमस्य योनिरिति बहुव्रीहिसिद्ध-शारीरकीय-शास्त्रयोनित्वाधिकरणस्थ-शास्त्रयोनिपदेन शास्त्रैकसमधिगम्यमिति प्रमाणान्तराणाम् अभूमित्वात् तज्ज्ञानाय वेदार्थज्ञानस्यावश्यकता सिध्यति। 'वेदस्तत्त्वं तपो ब्रह्म' इति कोशात्, आद्युदात्तवेदशब्दः शब्दप्रमाणवाची, परतत्त्ववाची तथा तपोवाची च भवति । 'तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति....', 'सर्वे वेदा यत्पदमामनन्ति, तपांसि सर्वाणि च यद्वदन्ति, यदिच्छन्तो ब्रह्मचर्यं चरन्ति, तत्ते पदं संग्रहेण ब्रवीम्योमित्येतत्', 'अस्य ह वै महतो भूतस्य निःश्वसितमेतद्यदृग्वेदो यजुर्वेद-स्सामवेदोऽथर्वाङ्गिरसम्', 'अनन्ता वै वेदाः', 'वाचा विरूप नित्यया', 'पूर्वे पूर्वभ्यो वच एतदूचुः' इत्यादिभिः नित्यत्वमपौरुषेयत्वं च गम्यते । 'अत एव च नित्यत्वम्', 'समाननामरूपत्वाच्चावृत्तावप्यविरोधो दर्शनात् स्मृतेश्च' इति सूत्रं च वरीवर्ति एतदुपोद्बलकम् । 'अनादिनिधना ह्येषा वागुत्सृष्टा स्वयम्भुवा । आदौ वेदमयी दिव्या यतः सर्वाः प्रसूतयः ॥', 'वेदेन रूपे व्यकरोत् । सतासती प्रजापतिः', 'नामरूपं च भूतानां कृत्यानां च प्रपञ्चनम् । वेदशब्देभ्य एवादौ पृथक्संस्थाश्च निर्ममे ॥', 'स भूरिति व्याहरत् । स भूमिमसृजत ।' इत्यादिप्रमाणानि वेदाः विश्वस्य जगतः नामरूपव्याकरणोपयुक्ताः इति स्पष्टयन्ति । ईदृशस्य वर्णनातीतमहिम्नः वेदाख्यशब्दराशेः अध्ययनं विहितं वेदे एव 'स्वाध्यायोऽध्येतव्यः' इति, 'स्वाध्यायप्रवचनाभ्यां न प्रमदितव्यम्' इत्यादिना । पञ्चमहायज्ञेषु ब्रह्मयज्ञस्य च प्रयोजनं पितृसुरमुखतः हव्यकव्यभुजः एकस्य सर्वकर्मसमाराध्यस्य भगवतः प्रीणनं, तदनुग्रहेण आयुस्तेजोवर्चःश्रीर्यशोब्रह्मवर्चसान्नाद्यफलाय कल्पत इति । स्वाध्यायमकुर्वतो निन्दा च 'यस्तित्याज सखिविदँ सखायं न तस्य वाच्यपि भागो अस्ति । यदीं शृणोत्यलकँ शृणोति न हि प्रवेद सुकृतस्य पन्थामिति' श्रुतम् । 'यस्तन्न वेद किमृचा करिष्यति य इत्तद्विदुस्त इमे समासते' इति तदर्थज्ञानं तेन सर्वफलावाप्तिः, सर्वत्र 'य एवं वेद' इत्यादिभिः विहितयज्ञादिकर्मानुष्ठानतुल्यफलं तद्वेदितुरपि भवतीति श्रवणात्सिध्यति । 'शास्त्रं हि वत्सलतरं मातापितृसहस्रतः' इति सर्वहितैषित्वं च वेदानां 'त्रैगुण्यविषया वेदाः', 'यावानर्थ उदपाने' इत्यादौ प्रपञ्चितम् ।

## वेदविन्महिमा

परं ब्रह्म पुरुषोत्तमो नारायणः भगवान् पाण्डवानां कुरूणां च युद्धे प्रारब्धे पार्थं रथिनम् आत्मानं च सारथिं सर्वलोकसाक्षिकं कृत्वा परमपुरुषार्थलक्षणमोक्षसाधनतया वेदान्तोदितं स्वविषयं ज्ञानकर्मानुगृहीतं भक्तियोगं यदा भगवद्गीताद्वारा अवतारयामास, तदा 'वेदैश्च सर्वैरहमेव वेद्यः वेदान्तकृद्वेदविदेव चाहम्' इत्यत्र स्वस्य सर्ववेदवेद्यत्वं, वेदवित्त्वं च स्पष्टम् उद्घोषितवान् । सर्वैः वेदैरिति भेद-अभेद-घटकश्रुतिरूपविभिन्नत्वेन आपाततः प्रतीयमानभागानां विवक्षया तेषां सर्वेषामैककण्ठ्यं प्रतिज्ञायते । 'यो वै वेदांश्च प्रहिणोति तस्मै' इति श्रुतिरपि जागर्ति । 'तद्धैतत् ब्रह्मा प्रजापतय उवाच, प्रजापतिर्मनवे मनुः प्रजाभ्यः' इति क्रमेण मनीषिणः ऋषयः मन्त्रकृतः मन्त्रपतयश्च तपसा श्रमेण वाचं देवीमुपास्य तदनुग्रहेण, 'वातरशना ह वा ऋषयः श्रमणा ऊर्ध्वमन्थिनो बभूवुः', 'अजान् ह वै पृश्नींस्तपस्यमानान् ब्रह्म स्वयम्भ्वभ्यानर्षत् त ऋषयोऽभवन्तदृषीणामृषित्वं', ब्रह्मणः स्वयम्भोः स्वयं प्रसत्त्या तान्प्रत्यागमनात् ऋषयोऽभवन्निति श्रूयते । अतः वेदविदां महिमातिशयः सम्यक् ज्ञायते । ब्रह्मवित्, वेदवित्, श्रोत्रियः, विद्वान्, धीरः, सूरिः, दैव्यो जनः इत्यादि बहुप्रकारेण तेषां प्रभावः श्रुतिषु उद्घुष्टः । तर्हि 'उच्चैर्गतिः जगति सिध्यति धर्मतश्चेत् तस्य प्रमा च वचनैः कृतकेतरैश्चेत् । तेषां प्रकाशनदशा च महीसुरैश्चेत् तानन्तरेण निपतेत् क्व नु मत्प्रणामः ॥' इति भोजराजोक्तेः नित्यापौरुषेयवेदवाचां स्वरूपेण अनुष्ठानेन च प्रकाशकाः, 'एते वै देवाः प्रत्यक्षं यद्ब्राह्मणाः' इति प्रशस्ताः, वेदविदः, सर्वविधसम्मानार्हाः पङ्क्तिपावनाश्चेत्यपि श्रूयते । 'ये ब्राह्मणास्त्रिसुपर्णं पठन्ति। ते सोमं प्राप्नुवन्ति । आसहस्रात् पङ्क्तिं पुनन्ति ।' इति, 'ये ब्राह्मणा बहुविदः । तेभ्यो यद्दक्षिणा न नयेत् । दुरिष्टँ

स्यात् । अग्निमस्य वृञ्जीरन् । तेभ्यो यथाश्रद्धं दद्यात् । स्विष्टमेवैतत् क्रियते । नास्याग्निं वृञ्जते । हिरण्येष्टको भवति ।' इति, 'यावतीर्वै देवतास्तास्सर्वा वेदविदि ब्राह्मणे वसन्ति तस्माद्ब्राह्मणेभ्यो वेदविद्भ्यो दिवेदिवे नमस्कुर्यान्नाश्लीलं कीर्तयेदेता एव देवताः प्रीणाति' इत्यादिषु ।

**वेदार्थविज्ञानविचारः**

तस्यैतादृशस्य वेदस्य छादनाच्छन्दस्त्वमिति छन्दःशब्दवाच्यस्य बहुदुरूहार्थगर्भितस्य यथावस्थितार्थावगत्यर्थं षट् अङ्गानि शिक्षाद्याः वेदेष्वेव अपेक्षिततत्वेन निर्दिष्टाः 'तत्रापरा ऋग्वेदः' इत्यादौ । उपाङ्गानि च न्याय, मीमांसा, पुराण, धर्मशास्त्राख्यानि वेदानां साङ्गानाम् अर्थावगतौ उपकुर्वते । 'तस्मात्साङ्गमधीत्यैव ब्रह्मलोके महीयते' इति भगवान् पाणिनिः । लक्षणग्रन्थाश्च वेदानुपूर्वीपरिरक्षणे अत्यन्तमुपयुक्ताः । वेदभाष्यैश्च व्याख्यानात् विशेषप्रतिपत्तिः भवति । एवं सलक्षण, साङ्ग, भाष्याधिकारिणः वेदविदः लोकस्य परमोपकारमातन्वत इति निश्चप्रचम् । आचारस्य च प्राधान्यं 'स्वाध्यायप्रवचनाभ्यां न प्रमदितव्यम् । देवपितृकार्याभ्यां न प्रमदितव्यम्' इति शिष्टमस्ति । एवं नित्य, नैमित्तिक वर्णाश्रमधर्मानुष्ठातारः श्रौत, गृह्योक्त कर्मानुतिष्ठन्तः भूसुराः भगवताऽपि श्रीकृष्णेन 'नित्यान्नदाता तरुणाग्निहोत्री, वेदान्तवित्' इत्यादीनां स्वस्य वन्दनीयत्वेन कथितत्वात् प्रशंसापात्राणि भवन्ति ।

अत्र स्थालीपुलाकन्यायेन पुरुषसूक्तस्य पाणिनीयशिक्षानुसारम् अर्थावगतिप्रकारैकदेशः विव्रियते । अस्माभिः ईदृशानुसन्धानादिसौकर्याय संगणकयन्त्रद्वारा बहवः प्रकल्पाः विकसिताः आधुनिकविज्ञानसाहाय्येन ये च निःशुल्कं सर्वेषाम् अन्तर्जाले सुलभाः सन्ति ।

पाणिनीयशिक्षायाम् (45-47) 'अन्तोदात्तमाद्युदात्तमुदात्तमनुदात्तं नीचस्वरितम् । मध्योदात्तं स्वरितं द्व्युदात्तं त्र्युदात्तमिति **नवपदशय्या** । अग्निः सोमः प्र वो वीर्यं हविषां स्वर्बृहस्पतिरिन्द्राबृहस्पती । अग्निरित्यन्तोदात्तं सोम इत्याद्युदात्तम् । प्रेत्युदात्तं व इत्यनुदात्तं वीर्यं नीचस्वरितम् । हविषां मध्योदात्तं स्वरिति स्वरितम् । बृहस्पतिरिति द्व्युदात्तमिन्द्राबृहस्पती इति त्र्युदात्तम् ॥' इति वेदगताः सर्वे शब्दाः नवस्वेव विभागेषु अन्तर्भवन्तीति निर्दिष्टम् । तदनुसारेण तैत्तिरीयारण्यके तृतीयप्रपाठकगते पुरुषसूक्ते विमृष्टे तत्रत्य पदानां विवेचनमित्थम् -

**1. अन्तोदात्तानि** - स॒ह॒स्रा॒क्षः । वृ॒त्वा । द॒शा॒ङ्गु॒लम् । ए॒व । इ॒दम् । भू॒तम् । उ॒त । म॒हि॒मा । त्रि॒पात् । दि॒वि। इ॒ह । ऊ॒र्ध्वः । सा॒श॒ना॒न॒श॒ने । अ॒भि । वि॒राट् । जा॒तः । प॒श्चात् । पु॒रः । दे॒वाः । य॒ज्ञम् । व॒स॒न्तः । ग्री॒ष्मः । इ॒ध्मः । श॒रत् । ह॒विः । स॒प्त । कृ॒ताः । त॒न्वा॒नाः । प॒शुम् । जा॒तम् । अ॒ग्र॒तः । सा॒ध्याः । य॒ज्ञात् । पृ॒ष॒दा॒ज्यम्। प॒शून् । आ॒र॒ण्यान् । ग्रा॒म्याः । जा॒ताः । क॒ति॒धा । बा॒हू । ऊ॒रू । ब्रा॒ह्म॒णः । कृ॒तः । प॒द्भ्याम् । शू॒द्रः । अ॒ग्निः । प्रा॒णात् । वा॒युः । शी॒र्ष्णः । लो॒कान् । अ॒हम् । ए॒तम् । पा॒रे । कृ॒त्वा । धा॒ता । श॒क्रः । वि॒द्वान् । ए॒वम् । अ॒न्यः।

**2. आद्युदात्तानि** - पुरु॑षः । भूमि᳚म् । सर्व᳚म् । अति॑ । भव्य᳚म् । ईशा॑नः । अन्ने॑न । अतः॑ । ज्याया॑न् । पूरु॑षः। पादः॑ । विश्वा᳚ । पुनः॑ । ततः॑ । विष्व॑ङ्ङ् । तस्मा᳚त् । अधि॑ । अति॑ । अथो᳚ । पुरु॑षेण । अत॑न्वत । आज्य᳚म् । अब॑ध्नन् । पुरु॑षम् । अय॑जन्त । ऋष॑यः । सम्भृ॑तम् । ऋचः॑ । सामा॑नि । छन्दा॑ꣳसि । यजुः॑ । अश्वाः᳚ । गावः॑। मुख᳚म् । पादौ᳚ । वैश्यः॑ । मन॑सः । चक्षोः᳚ । सूर्यः॑ । मुखा᳚त् । इन्द्रः॑ । नाभ्याः᳚ । भूमिः॑ । दिशः॑ । श्रोत्रा᳚त् । तथा᳚। वेद॑ । तम॑सः । सर्वा॑णि । धीरः॑ । नामा॑नि । आस्ते᳚ । चत॑स्रः । पन्थाः᳚ । अय॑नाय । तानि॑ । धर्मा॑णि । नाक᳚म्। यत्र॑ । पूर्वे᳚ । सन्ति॑ ।

**3. उदात्तानि** - सः । यत् । उत् । वि । त्रिः । तम् । प्र । ये । तान् । के । किम् । कौ । तत् । द्यौः । सम्। तु । यम् । न । ते ।

**4. अनुदात्तानि** - अ॒ति॒ष्ठ॒त् । च॒ । अ॒स्य॒ । अ॒भ॒वा॒त् । ऐ॒त् । अ॒क्रा॒म॒त् । अ॒जा॒य॒त । अ॒रि॒च्य॒त । आ॒सी॒त् । औ॒क्ष॒न्न् । च॒क्रे॒ । ज॒ज्ञि॒रे॒ । अ॒जा॒य॒न्त॒ । ह॒ । अ॒द॒धुः॒ । अ॒क॒ल्प॒य॒न्न् । उ॒च्य॒ते॒ । अ॒व॒र्त॒त॒ । भ॒व॒ति॒ । वि॒द्य॒ते॒ । अ॒य॒ज॒न्त॒ । आ॒स॒न्न् । स॒च॒न्ते॒ ।

**5. नीचस्वरितानि** - वा॒य॒व्यान्॑ । रा॒ज॒न्यः॑ ।

**6. मध्योदात्तानि** - स॒हस्र॑शीर्षा । स॒हस्र॑पात् । वि॒श्वत॑ः । अ॒मृ॒त॒त्वस्य॑ । अ॒ति॒रोह॑ति । ए॒तावा॑न् । भू॒तानि॑ । अ॒मृत᳚म् । वि॒राज॑ः । ह॒विषा᳚ । प॒रि॒धय॑ः । स॒मिध॑ः । ब॒र्हि॒षि॑ । स॒र्व॒हु॒त॑ः । उ॒भ॒याद॑तः । अ॒जा॒वय॑ः । च॒न्द्रमा᳚ः । अ॒न्तरि॑क्षम् । म॒हान्त᳚म् । आ॒दि॒त्यव॑र्णम् । रू॒पाणि॑ । वि॒चित्य॑ । अ॒भि॒व॒दन्॑ । पु॒रस्ता᳚त् । उ॒दा॒ज॒हार॑ । प्र॒दिश॑ः । अ॒मृत॑ः । य॒ज्ञेन॑ । प्र॒थ॒मानि॑ । म॒हि॒मान॑ः ।

**7. स्वरितानि** - 0, **8. द्व्युदात्तानि** - 0, **9. त्र्युदात्तानि** - 0

तद्विश्लेषणं चेत्थम् -

स॒हस्र॑शीर्षा । स॒हस्र॑पात् । वि॒श्वत॑ः । अ॒मृ॒त॒त्वस्य॑ । अ॒ति॒रोह॑ति । ए॒तावा॑न् । भू॒तानि॑ । अ॒मृत᳚म् । वि॒राज॑ः । ह॒विषा᳚ । प॒रि॒धय॑ः । स॒मिध॑ः । ब॒र्हि॒षि॑ । स॒र्व॒हु॒त॑ः । उ॒भ॒याद॑तः । अ॒जा॒वय॑ः । च॒न्द्रमा᳚ः । अ॒न्तरि॑क्षम् । म॒हान्त᳚म्। आ॒दि॒त्यव॑र्णम् । रू॒पाणि॑ । वि॒चित्य॑ । अ॒भि॒व॒दन्॑ । पु॒रस्ता᳚त् । उ॒दा॒ज॒हार॑ । प्र॒दिश॑ः । अ॒मृत॑ः । य॒ज्ञेन॑ । प्र॒थ॒मानि॑। म॒हि॒मान॑ः । - 30 (31)

पुरु॑षः । भूमि᳚म् । सर्व᳚म् । अति॑ । भव्य᳚म् । ईशा॑नः । अन्ने॑न । अत॑ः । ज्यायान्॑ । पूरु॑षः । पाद॑ः । विश्वा᳚ । पाद॑ः । पुरु॑षः । पुन॑ः । तत॑ः । विष्वङ्॑ । तस्मा᳚त् । पूरु॑षः । अधि॑ । अति॑ । भूमि᳚म् । अथो᳚ । पुरु॑षेण । अत॑न्वत । आज्य᳚म् । अब॑ध्नन् । पुरु॑षम् । पुरु॑षम् । तेन॑ । अय॑जन्त । ऋष॑यः । तस्मा᳚त् । सम्भृ॑तम् । तस्मा᳚त्। ऋच॑ः । सामा॑नि । छन्दाꣳ॑सि । तस्मा᳚त् । यजु॑ः । तस्मा᳚त् । तस्मा᳚त् । अश्वा᳚ः । गाव॑ः । तस्मा᳚त् । तस्मा᳚त् । पुरु॑षम् । मुख᳚म् । पादौ᳚ । मुख᳚म् । वैश्य॑ः । मन॑सः । चक्षो᳚ः । सूर्य॑ः । मुखा᳚त् । इन्द्र॑ः । नाभ्या᳚ः । भूमि॑ः । दिश॑ः । श्रोत्रा᳚त् । तथा᳚ । वेद॑ । पुरु॑षम् । तम॑सः । सर्वा॑णि । धीर॑ः । नामा॑नि । आस्ते᳚ । चत॑स्रः । पन्था᳚ः । अय॑नाय । तानि॑ । धर्मा॑णि । नाक᳚म् । यत्र॑ । पूर्वे᳚ । सन्ति॑ । - 63 (78)

स॒ह॒स्रा॒क्षः । वृ॒त्वा । द॒शा॒ङ्गु॒लम् । ए॒व । इ॒दम् । भू॒तम् । उ॒त । म॒हि॒मा । त्रि॒पात् । दि॒वि । त्रि॒पात् । इ॒ह । ऊ॒र्ध्वः । सा॒श॒ना॒न॒श॒ने । अ॒भि । वि॒राट् । जा॒तः । प॒श्चात् । पु॒रः । दे॒वाः । य॒ज्ञम् । व॒स॒न्तः । ग्री॒ष्मः । इ॒ध्मः। श॒रत् । ह॒विः । स॒प्त । स॒प्त । कृ॒ताः । दे॒वाः । य॒ज्ञम् । त॒न्वा॒नाः । प॒शुम् । य॒ज्ञम् । जा॒तम् । अ॒ग्र॒तः । दे॒वाः। सा॒ध्याः । य॒ज्ञात् । पृ॒ष॒दा॒ज्यम् । प॒शून् । आ॒र॒ण्यान् । ग्रा॒म्याः । य॒ज्ञात् । जा॒ताः । क॒ति॒धा । बा॒हू । ऊ॒रू । ब्रा॒ह्म॒णः । बा॒हू । कृ॒तः । कृ॒त्वा । ऊ॒रू । प॒द्भ्याम् । शू॒द्रः । जा॒तः । अ॒ग्निः । प्रा॒णात् । वा॒युः । शी॒र्ष्णः । प॒द्भ्याम्। लो॒कान् । अ॒हम् । ए॒तम् । पा॒रे । धा॒ता । श॒क्रः । वि॒द्वान् । ए॒वम् । वि॒द्वान् । इ॒ह । अ॒न्यः । य॒ज्ञम् । दे॒वाः। सा॒ध्याः । दे॒वाः । - 59 (76)

सः । यत् । यत् । यत् । उत् । वि । सः । यत् । त्रिः । यत् । तम् । प्र । ये । तान् । ये । ये । के । यत्। वि । वि । किम् । कौ । कौ । तत् । यत् । द्यौः । सम् । तु । यत् । यम् । प्र । तम् । न । ते । - 19 (34)

अ॒ति॒ष्ठ॒त् । च॒ । अ॒स्य॒ । च॒ । अ॒स्य॒ । अ॒स्य॒ । अ॒स्य॒ । अ॒भ॒वा॒त् । ऐ॒त् । अ॒क्रा॒म॒त् । अ॒जा॒य॒त॒ । अ॒रि॒च्य॒त॒ । अ॒स्य॒ । आ॒सी॒त् । अ॒स्य॒ । आ॒स॒न् । औ॒क्ष॒न्न् । च॒ । च॒क्रे॒ । च॒ । ज॒ज्ञि॒रे॒ । ज॒ज्ञि॒रे॒ । अ॒जा॒य॒त॒ । अ॒जा॒य॒न्त॒ । च॒ । ह॒ । ज॒ज्ञि॒रे॒ । अ॒द॒धुः॒ । अ॒क॒ल्प॒य॒न्न् । अ॒स्य॒ । उ॒च्य॒ते॒ । अ॒स्य॒ । आ॒सी॒त् । अ॒स्य॒ । अ॒जा॒य॒त॒ । च॒ । च॒। अ॒जा॒य॒त॒ । आ॒सी॒त् । अ॒व॒र्त॒त॒ । अ॒क॒ल्प॒य॒न्न् । भ॒व॒ति॒ । वि॒द्य॒ते॒ । अ॒य॒ज॒न्त॒ । आ॒स॒न्न् । ह॒ । स॒च॒न्ते॒ । - 26 (48)

वा॒य॒व्यान्॑ । रा॒ज॒न्य॑ः । - 2 (2)

वेदाध्यापनधर्मस्य पालनप्राप्तकीर्तयः । परमाचार्यवाचाऽपि श्रोत्रियाः कामनाऽहताः ॥

राजगोपालशर्माणः एधन्तां शरदां शतम् । इति विज्ञापयत्येष रामानुजसुधीर्मुदा ॥

प्रीयतां मे जनार्दनः । शुभमस्तु ॥